National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 313-315
© 2026 NJHSR
www.sanskritarticle.com

**यस् . गोपालकृष्णः**
शोधच्छात्रः, आगमविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**यस् . गोपालकृष्णः**
शोधच्छात्रः, आगमविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# पाद्मसंहितानुसारं दशावतारमूर्तिकल्पनम्

**यस् . गोपालकृष्णः**

अल्पास्थिरफलानि परित्यज्य अनल्प - स्थिर फलानि संसाधयितुम् उद्युक्तस्य मानवस्य निदानभूत एव आगमः। सृष्टि - प्रलय - देवतार्चन - साधन - पुरश्चरण - षट्कर्मसाधन - ध्यानयोग इति सप्तभिः लक्षणैः संयुक्तस्यागमस्य प्राधान्यं कलौ युगे एव निर्दिश्यते। आगमः प्रधानतया सगुणाराधनं उपदिशति। भगवतः बिम्बकल्पनमेव आगमस्य मुख्योद्देश्यं स्यात्। सगुणाराधनं द्विविधं भवति स्वार्थार्चनम्, परार्थार्चनम् इति।

स्वार्थार्चनं गृहार्चनं स्यात्। परार्थार्चनम् आलयार्चनमेव। परार्थार्चनार्थं परिकल्पितं नूतनं स्थानं भरतीयतत्त्वस्य धर्मस्य संस्कृतेश्च केन्द्रभूतः देवालयः। देवालयेऽस्मिन् अविच्छिन्नतया अनुष्ठीयमानं शास्त्रम् आगमशास्त्रं भवेत्। इदं तावत् नैकथा विभक्तं देवता प्राधान्येन वैष्णव – शैव -शाक्त - गाणापत्य - कौमार - सौरभेदेन षड्विधं स्यात्। अस्यागमस्य तत्तत् देवताप्राधानाः देवताः तत्तत् मन्त्राः तत्तत् देवता सम्बद्धक्रियाः प्राधान्यमावहन्ति।

विष्णोः प्रधानदैवत्वम् अङ्गीकृत्य प्रविराजति वैष्णवागमः। असौ द्विविधः वैखानस- पाञ्चरात्र इति।

वैखानसं तावत् विखनोमुनि आरभ्य वंशपारंपर्यानुरोधेन भृगु - मरीचि - अत्रि - कश्यपैश्च उपदिष्टेन वैखानसवाङ्मयसर्वस्वेन प्रसारति।

पाञ्चरात्रागमः तावत् श्रीमन्नारायणद्वारा पञ्चभ्यः योगिपुङ्गवेभ्यः तद्वारा पञ्चसंस्कारदीक्षया प्रचलति। अस्मिन् पाञ्चरात्रागमे संहिता नाम्ना ग्रन्थाः नैके सन्ति। तेषु प्रधानग्रन्थः पाद्मसंहिता इति पाञ्चरात्रविदः अभिप्रयन्ति। अस्मिन् पाञ्चरात्रागमग्रन्थे दशावतारमूर्तिकल्पनं कथमुपदिष्टम् ? तस्य स्वरूपं कीदृशम्? मूर्तिभेदाः के ? इत्येते अंशाः पत्रेऽस्मिन् यथामति प्रस्तोतुमिच्छामि।

**दशावतारमूर्तयः**

**मीनादि दशमूर्तीनां अधुना स्थापनमपि।**
**विशेषः कथ्यते ब्रह्मन् उपस्थानादि लक्षणः॥**[1] इति

मीन - कूर्म - वराह - नृसिंह - वामन - जमदग्नि - श्रीराम - बलराम - श्रीकृष्ण - कल्की इति दशानां विष्णोः अवतारमूर्तयः स्पष्टमुपदिष्टासन् पाद्मसंहितायाम्।

**मीनमूर्तिकल्पनम्**

**मीनात्मने नमस्तुभ्यं वेदरक्षाविधायिने ।**
**प्रलयार्णव दुर्वार वारिपूर विहारिणे॥**[2] इति

अनया प्रार्थनया मीनमूर्तिं परिकल्प्य वारुणमन्त्रेण अष्टाक्षरविद्यया वा संस्थाप्य मन्त्रजलैः हरिं तत्र आवाहयेत्।

**कूर्ममूर्तिः**

**तुभ्यं नमस्क्रियां कुर्मः कूर्म रूपाय वेधसे।**

**धारिणे मन्दरस्याद्रेः विबुधानन्ददायिने**[3]॥ इति

अनया प्रार्थनया मन्दरपर्वतस्य आधाररूपं देवताबृन्धानन्ददायिनं कूर्मरूपं परिकल्पनं भवतु इति कूर्ममूर्तिविचारः स्पष्टमुपदिष्टः पाद्मसंहितायाम्।

**वराहमूर्तिः**

**क्रोडात्मने नमस्तुभ्यं यज्ञरूपाय वेधसे।**

**दंष्ट्राग्र विधृताशेष धारिणे धरणीधर**[4]॥ इति

अनया प्रार्थनया दंष्ट्राग्रे धरणीधरं अशेषधारिणं यज्ञरूपं वराहरूपं परिकल्प्य संस्थाप्य आगमोक्तानुसारेण प्रतिष्ठां कल्पयतु इति प्रोच्यते तत्र।

**नृसिंहमूर्तिः**

**निशातनखदम्भोलि दलितासुरवक्षसे।**

**दर्शिताश्रित वात्सल्य नृसिंहवपुषे नमः**[5]॥ इति

हिरण्यकशिपुं नाम राक्षसं ऊर्वोः संस्थाप्य नखैः हृदयं विदार्य आश्रितदेवताबृन्दान् वात्सल्येन अनुगृहीतरूपः नृसिंहः भवतु इति साङ्गोपाङ्गं सवैदिकं उपदिश्यते तत्र।

**वामनः**

**बलिद्विषे नमस्तुभ्यं यज्ञरूपाय वेधसे।**

**वामनाय महामाया वञ्चिताशेष मानव**[6]॥ इति

बलिचक्रवर्तिनं पाताले संस्थाप्य त्रीन् लोकान् आक्रम्य धर्मस्थापनं कृतवान् वामनः । असौ त्रिविक्रम एव भवति। युंजीत इति अनुवाकमन्त्रैः वामनं संस्थाप्य आवाह्यार्चयेदिति वामनमूर्तिकल्पनं साङ्गोपाङ्गं उपदिश्यते पाद्मसंहितायाम्।

**जमदग्निः**

**त्रिः सप्तकृत्वः क्षत्राणां निहन्त्रे तिग्मतेजसे।**

**नमस्तुभ्यं भगवते परश्वथ विधारिणे** [7]॥ इति

पाद्मसंहितावचनानुसारेण एकविंशति संख्याकान् दुष्टक्षत्रियान् हननं कृत्वा परशुं धृत्वा राराजति

**नमस्तुभ्यं भगवते राघवाय महात्मने ।**

**रावणादिजगद्वैरि निबर्हणमहौजसे**[8]॥ इति

वैदेहीसहितं लक्ष्मणादि परिवृतं हनुमतासह विभीषण - जाम्बवान् - नल - वशिष्ठ - लोकपाल - विष्वक्सेन - गरुडादिपरिषद्देवताबृन्दैसह श्रीरामचन्द्रः प्रतिष्ठापनीयः।अर्चनीयः वन्दनीयश्च इति श्रीरामप्रतिष्ठा कल्पनं विव्रीयते पाद्मसंहितायाम्।

**बलरामः**

**बलिने बलभद्राय हलस्फुरित बाहवे।**

**तुभ्यं मूलेव महती भूमिर्येन शिरोधृता**[9]॥ इति

अनया प्रार्थनया बलराममूर्तिं प्रकल्प्य प्रतिष्ठा कार्या इति उपदिश्यते पाद्मसंहितायाम्।

**श्रीकृष्णः**

**वृष्णिवर्याय कृष्णाय नमस्तुभ्यं मधुद्विषे।**

**भूभारभूत कंसादि महासुर निघातिने**[10]॥ इति

वसुदेवसुतस्य श्रीकृष्णस्य मूर्तिकल्पनं बिम्बप्रतिष्ठामन्त्राः मूर्तिप्रतिष्ठा च विव्रियते पाद्मसंहितायाम्।

**कल्किमूर्तिः**

**म्लेच्छानामपि संहर्त्रे साधूनांस्थितिहेतवे।**

**नमस्तुभ्यं भगवते भूसुरान्वयजन्मने**[11]॥ इति

युगान्ते धर्मस्थापनाय अधर्मनिरसनाय साधुसंरक्षणाय दुष्टशिक्षणाय च आविर्भावमूर्तिविशेषः कल्किरूपः भवेत्।

अनेन प्रकारेण मीन - कूर्म - वराह - नृसिंह - वामन - जमदग्नि - श्रीराम - बलराम - श्रीकृष्ण - कल्की इति दशानाम् मूर्तीनां कल्पनं साङ्गोपाङ्गं ग्रन्थान्तरापेक्षया विशेषतया पाद्मसंहितायाम् उपदिशते। तत्रापि भगवतः श्रीमन्नारायणस्य व्यूहरूपाणि चत्वारि भवन्ति वासुदेव - संकर्षण - प्रद्युम्न - अनिरुद्ध इति। एतेभ्यः चतुर्भ्यः व्यूहरूपेभ्यः मीनादिदशमूर्तयः समागताऽभवन् इति पाद्मसंहिता[12] सुस्पष्टम् उपदिशति।

**मीनद्या जज्ञिरे विप्र चतुर्व्यूहाद्यथाक्रमम्।**

**मत्स्यः कूर्मो वराहश्च वासुदेवादजायत ॥**

**नृसिंहो वामनो रामो जामदग्न्योऽप्यजायत।**

**संकर्षणात्तथा जज्ञे प्रद्युम्नाद्राघवो बली॥**

**अनिरुद्धादभूत् कृष्णः कल्कीति दशमूर्तयः॥**

वासुदेवव्यूहरूपात् मत्स्यकूर्मवराहमूर्तयः संकर्षणव्यूहरूपात् नृसिंह - वामन - राम - परशुराममूर्तयः प्रद्युम्नव्यूहरूपात् परशुरामः अनिरुद्धव्यूहरूपात् कृष्णकल्किमूर्तयः प्रादुर्भूतासन् इति पाद्मसंहिता उपदेश सर्वशः।

**निष्कर्षः**

परमात्मा श्रीमन्नारायणः अल्पज्ञानस्मान् अनुग्रहीतुं संवर्थयितुं तत्तत् संदर्भेषु व्यूहरूपंवा, विभवरूपं वा धृत्वा धर्मस्थापनं कृत्वा अस्माननुग्रहीतवान् इति सारांशः। आगमज्ञाः दार्शनिकाः आस्तिकाः

आचार्यवर्याश्च विभवमूर्तिकल्पनस्य तत्त्वं गृहीत्वा धन्याः भवन्तु इति आशास्य विरमामि विस्तरात्।

**न दैवं केशवात् परम्**

**आधारग्रन्थाः**


**पाद्मसंहिता**

पाञ्चरात्रपरिशोधनापरिषत् - मद्रास् - १९७४

**पौष्करसंहिता**

राष्ट्रियसंस्कृतविश्वविद्यालयः - तिरुपतिः - १९९१

**सात्वतसंहिता**

संपूर्णानन्दसंस्कृतविश्वविद्यालयः - वाराणसी – २००१


**पाद टिप्पणी:**

[1]पाद्मसंहिता क्रियापादः – 29,1

[2]तत्रैव - 29,4

[3]तत्रैव - 29, 6

[4]तत्रैव - 29, 8

[5]तत्रैव - 29. 10

[6]तत्रैव - 29. 12

[7]तत्रैव - 29. 14

[8]तत्रैव - 29. 17

[9]तत्रैव - 29.,27

[10] तत्रैव - 29. 28

[11] तत्रैव - 29. 31

[12] ज्ञानपादः - 2, 31-33